# Krama Stotram

# ક્રમસ્તોત્રમ્

## Document Information

Text title : Krama Stotram by Abhinavagupta

File name : kramastotram.itx

Category : shiva, abhinavagupta

Location : doc_shiva

Author : Abhinavagupta

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description-comments : from Abhinavastotravali

Latest update : December 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2021

*sanskritdocuments.org*

# ક્રમસ્તોત્રમ્

અયં દુઃખવ્રાતવ્રતપરિગમે પારણવિધિ-
    ર્મહાસૌખ્યાસારપ્રસરણરસે દુર્દિનમિદમ્ ।
યદન્યન્યક્કૃત્યા વિષમવિશિખપ્લોષણગુરો-
    ર્વિભોઃ સ્તોત્રે શશ્વત્પ્રતિફલતિ ચેતો ગતભયમ્ ॥ ૧॥

વિમૃશ્ય સ્વાત્માનં વિમૃશતિ પુનઃ સ્તુત્યચરિતં
    તથા સ્તોતા સ્તોત્રે પ્રકટયતિ ભેદૈકવિષયે ।
વિમૃષ્ટશ્ચ સ્વાત્મા નિખિલવિષયજ્ઞાનસમયે
    તદિત્થં ત્વત્સ્તોત્રેઽહમિહ સતતં યત્નરહિતઃ ॥ ૨॥

અનામૃષ્ટઃ સ્વાત્મા ન હિ ભવતિ ભાવપ્રમિતિભાક્
    અનામૃષ્ટઃ સ્વાત્મેત્યપિ હિ ન વિનાઽઽમર્શનવિધેઃ ।
શિવશ્ચાસૌ સ્વાત્મા સ્ફુરદખિલભાવૈકસરસ-
    સ્તતોઽહં ત્વત્સ્તોત્રે પ્રવણહૃદયો નિત્યસુખિતઃ ॥ ૩॥

વિચિત્રૈર્જાત્યાદિભ્રમણપરિપાટીપરિકરૈ-
    રવાપ્તં સાર્વજ્ઞં હૃદય યદયત્નેન ભવતા ।
તદન્તસ્ત્વદ્બોધપ્રસરસરણીભૂતમહસિ
    સ્ફુટં વાચિ પ્રાપ્ય પ્રકટય વિભોઃ સ્તોત્રમધુના ॥ ૪॥

વિધુન્વાનો બન્ધાભિમતભવમાર્ગસ્થિતિમિમાં
    રસીકૃત્યાનન્તસ્તુતિહુતવહપ્લોષિતભિદામ્ ।
વિચિત્રસ્વસ્ફારસ્ફુરિતમહિમારમ્ભરભસાત્
    પિબન્ ભાવાનેતાન્ વરદ મદમત્તોઽસ્મિ સુખિતઃ ॥ ૫॥

ભવપ્રાજ્યૈશ્વર્યપ્રથિતબહુશક્તેર્ભગવતો
    વિચિત્રં ચારિત્રં હૃદયમધિશેતે યદિ તતઃ ।
કથં સ્તોત્રં કુર્યાદથ ચ કુરુતે તેન સહસા
    શિવૈકાત્મ્યપ્રાપ્તૌ શિવનતિરુપાયઃ પ્રથમકઃ ॥ ૬॥

જ્વલદ્રૂપં ભાસ્વત્પચનમથ દાહં પ્રકટનં
    વિમુચ્યાન્યદ્વહ્નેઃ કિમપિ ઘટતે નૈવ હિ વપુઃ ।
સ્તુવે સંવિદ્રશ્મીન્ યદિ નિજનિજાંસ્તેન સ નુતો
    ભવેન્નાન્યઃ કશ્ચિદ્ ભવતિ પરમેશસ્ય વિભવઃ ॥ ૭॥

વિચિત્રારમ્ભત્વે ગલિતનિયમે યઃ કિલ રસઃ
    પરિચ્છેદાભાવાત્ પરમપરિપૂર્ણત્વમસમમ્ ।
સ્વયં ભાસાં યોગઃ સકલભવભાવૈકમયતા
    વિરુદ્ધૈર્ધર્મૌઘૈઃ પરચિતિરનર્ઘોચિતગુણા ॥ ૮॥

ઇતીદૃક્ષૈ રૂપૈર્વરદ વિવિધં તે કિલ વપુ-
    ર્વિભાતિ સ્વાંશેઽસ્મિન્ જગતિ ગતભેદં ભગવતઃ ।
તદેવૈતત્સ્તોતું હૃદયમથ ગીર્બાહ્યકરણ-
    પ્રબન્ધાશ્ચ સ્યુર્મે સતતમપરિત્યક્તરભસઃ ॥ ૯॥

તવૈવૈકસ્યાન્તઃ સ્ફુરિતમહસો બોધજલધે- (તવૈકૈકસ્યાન્તઃ)
    ર્વિચિત્રોર્મિવ્રાતપ્રસરણરસો યઃ સ્વરસતઃ ।
ત એવામી સૃષ્ટિસ્થિતિલયમયસ્ફૂર્જિતરુચાં
    શશાઙ્કાર્કાગ્નીનાં યુગપદુદયાપાયવિભવાઃ ॥ ૧૦॥

અતશ્ચિત્રાચિત્રક્રમતદિતરાદિસ્થિતિજુષો
    વિભોઃ શક્તિઃ શશ્વદ્ વ્રજતિ ન વિભેદં કથમપિ ।
તદેતસ્યાં ભૂમાવકુલમિતિ તે યત્કિલ પદં
    તદેકાગ્રીભૂયાન્મમ હૃદયભૂર્ભૈરવ વિભો ॥ ૧૧॥

અમુષ્માત્ સમ્પૂર્ણાત્ વત રસમહોલ્લાસસરસા-
    ન્નિજાં શક્તિં ભેદં ગમયસિ નિજેચ્છાપ્રસરતઃ ।
અનર્ઘં સ્વાતન્ત્ર્યં તવ તદિદમત્યદ્ભુતમયીં
    ભવચ્છક્તિં સ્તુન્વન્ વિગલિતભયોઽહં શિવમયઃ ॥ ૧૨॥

ઇદન્તાવદ્રૂપં તવ ભગવતઃ શક્તિસરસં
    ક્રમાભાવાદેવ પ્રસભવિગલત્કાલકલનમ્ ।
મનઃશક્ત્યા વાચાપ્યથ કરણચક્રૈર્બહિરથો
    ઘટાદ્યૈસ્તદ્રૂપં યુગપદધિતિષ્ઠેયમનિશમ્ ॥ ૧૩॥

ક્રમોલ્લાસં તસ્યાં ભુવિ વિરચયન્ ભેદકલનાં

સ્વશક્તીનાં દેવ પ્રથયસિ સદા સ્વાત્મનિ તતઃ । (દેવઃ)
ક્રિયાજ્ઞાનેચ્છાખ્યાં સ્થિતિલયમહાસૃષ્ટિવિભવાં
ત્રિરૂપાં ભૂયાસં સમધિશયિતું વ્યગ્રહૃદયઃ ॥ ૧૪॥ (ત્રિરૂપા)

પરા સૃષ્ટિર્લીના હુતવહમયી યાત્ર વિલસત્- (વિલસેત્)
પરોલ્લાસૌન્મુખ્યં વ્રજતિ શશિસંસ્પર્શસુભગા ।
હુતાશેન્દુસ્ફારોભયવિભવભાગ્ ભૈરવવિભો
તવેયં સૃષ્ટ્યાખ્યા મમ મનસિ નિત્યં વિલસતાત્ ॥ ૧૫॥

વિસૃષ્ટે ભાવાંશે બહિરતિશયાસ્વાદવિરસે
યદા તત્રૈવ ત્વં ભજસિ રભસાદ્ રક્તિમયતામ્ ।
તદા રક્તા દેવી તવ સકલભાવેષુ નનુ માં
ક્રિયાદ્રક્તાપાનક્રમઘટિતગોષ્ઠીગતઘૃણમ્ ॥ ૧૬॥

બહિર્વૃત્તિં હાતું ચિતિભુવમુદારાં નિવસિતું
યદા ભાવાભેદં પ્રથયસિ વિનષ્ટોર્મિચપલઃ ।
સ્થિતેર્નાશં દેવી કલયતિ તદા સા તવ વિભો
સ્થિતેઃ સાંસારિક્યાઃ કલયતુ વિનાશં મમ સદા ॥ ૧૭॥

જગત્સંહારેણ પ્રશમયિતુકામઃ સ્વરભસાત્
સ્વશઙ્કાતઙ્કાખ્યં વિધિમથ નિષેધં પ્રથયસિ ।
ઇમં સૃષ્ટ્વેત્થં ત્વં પુનરપિ ચ શઙ્કાં વિદલયન્ (યમં સૃષ્ટ્વેત્થં)
મહાદેવી સેયં મમ ભવભયં સન્દલયતામ્ ॥ ૧૮॥

વિલીને શઙ્કૌઘે સપદિ પરિપૂર્ણે ચ વિભવે
ગતે લોકાચારે ગલિતવિભવે શાસ્ત્રનિયમે ।
અનન્તં ભોગ્યૌઘં ગ્રસિતુમભિતો લમ્પટરસા
વિભો સંસારાખ્યા મમ હૃદિ ભિદાંશં પ્રહરતુ ॥ ૧૯॥

તદિત્થં દેવીભિઃ સપદિ દલિતે ભેદવિભવે
વિકલ્પપ્રાણાસૌ પ્રવિલસતિ માતૃસ્થિતિરલમ્ ।
અતઃ સંસારાંશં નિજહૃદિ વિમૃશ્ય સ્થિતિમયી
પ્રસન્ના સ્યાન્મૃત્યુપ્રલયકરણી મે ભગવતી ॥ ૨૦॥

તદિત્થં તે તિસ્રો નિજવિભવવિસ્ફારણવશા-
દવાપ્તાઃ ષટ્ચક્રં ક્રમકૃતપદં શક્તય ઇમાઃ ।
ક્રમાદુન્મેષેણ પ્રવિદધતિ ચિત્રાં ભુવિ દશા-

મિમાભ્યો દેવીભ્યઃ પ્રવણહૃદયઃ સ્યાં ગતભયઃ ॥ ૨૧॥

ઇમાં રુન્ધે ભૂમિં ભવભયભિદાતઙ્કકરણીં
ઇમાં બોધૈકાન્તદ્રુતિરસમયીં ચાપિ વિદધે ।
તદિત્થં સમ્બોધદ્રુતિમથ વિલુપ્યાશુભતતી-
ર્યથેષ્ટં ચાચારં ભજતિ લસતાત્ સા મમ હૃદિ ॥ ૨૨॥

ક્રિયાબુદ્ધ્યક્ષાદેઃ પરિમિતપદે માનપદવી-
મવાપ્તસ્ય સ્ફારં નિજનિજરુચા સંહરતિ યા ।
ઇયં માર્તણ્ડસ્ય સ્થિતિપદયુજઃ સારમખિલં
હઠાદાકર્ષન્તી કૃષતુ મમ ભેદં ભવભયાત્ ॥ ૨૩॥

સમગ્રામક્ષાલીં ક્રમવિરહિતામાત્મનિ મુહુ-
ર્નિવેશ્યાનન્તાન્તર્બહલિતમહારશ્મિનિવહા ।
પરા દિવ્યાનન્દં કલયિતુમુદારાદરવતી
પ્રસન્ના મે ભૂયાત્ હૃદયપદવીં ભૂષયતુ ચ ॥ ૨૪॥

પ્રમાણે સંલીને શિવપદલસદ્વૈભવવશા-
ચ્છરીરં પ્રાણાદિર્મિતકૃતકમાતૃસ્થિતિમયઃ ।
યદા કાલોપાધિઃ પ્રલયપદમાસાદયતિ તે
તદા દેવી યાસૌ લસતિ મમ સા સ્તાચ્છિવમયી ॥ ૨૫॥

પ્રકાશાખ્યા સંવિત્ ક્રમવિરહિતા શૂન્યપદતો
બહિર્લીનાત્યન્તં પ્રસરતિ સમાચ્છાદકતયા ।
તતોઽપ્યન્તઃસારે ગલિતરભસાદક્રમતયા
મહાકાલી સેયં મમ કલયતાં કાલમખિલમ્ ॥ ૨૬॥

તતો દેવ્યાં યસ્યાં પરમપરિપૂર્ણસ્થિતિજુષિ
ક્રમં વિચ્છિદ્યાશુ સ્થિતિમતિરસાત્સંવિદધતિ ।
પ્રમાણં માતારં મિતિમથ સમગ્રં જગદિદં (મિતમથ)
સ્થિતાં ક્રોડીકૃત્ય શ્રયતિ મમ ચિત્તં ચિતિમિમામ્ ॥ ૨૭॥

અનર્ગલસ્વાત્મમયે મહેશે તિષ્ઠન્તિ યસ્મિન્ વિભુશક્તયસ્તાઃ ।
તં શક્તિમન્તં પ્રણમામિ દેવં મન્થાનસંજ્ઞં જગદેકસારમ્ ॥ ૨૮॥

ઇત્થં સ્વશક્તિકિરણૌઘનુતિપ્રબન્ધાન્ (બન્ધાત્)
આકર્ણ્ય દેવ યદિ મે વ્રજસિ પ્રસાદમ્ ।

તેનાશુ સર્વજનતાં નિજશાસનાંશુ-
    સંશાન્તિતાખિલતમઃપટલાં વિધેયાઃ ॥ ૨૯॥

ષટ્ષષ્ઠિનામકે વર્ષે નવમ્યામસિતેઽહનિ ।
મયાઽભિનવગુપ્તેન માર્ગશીર્ષે સ્તુતઃ શિવઃ ॥ ૩૦॥

॥ ઇતિ શ્રીઅભિનવગુપ્તપાદાચાર્યકૃતં ક્રમસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ruma Dewan

*Krama Stotram*

pdf was typeset on December 23, 2021

Please send corrections to *sanskrit@cheerful.com*